© 2017 IJSRSET | Volume 3 | Issue 2 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099
Themed Section : Education

# चम्पूभारते यज्ञविवेचना



**डॉ. प्रदीप कुमार वाग्**

**सहायकाचार्य:, साहित्यविभाग:,**

**राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:**

**सारांश:–** वेदेषुबहुविधानां यागानां नामानि, तेषामनुष्ठानविधि:, महत्त्वमित्यादय: विषया: उल्लिखितास्सन्ति । तेषु यागेषुदर्शपूर्णमासौ, सोमयाग:, प्रवर्ग्ययाग:, राजसूययाग:, अश्वमेधयाग:, पुत्रेष्टि:, पौण्डरिकयाग: इत्यादय: प्रधाना:सन्ति । ब्राह्मणादय: अध्ययनं समाप्य यदा गृहस्थाभवन्ति, तदा तेषांकृते पञ्चमहायज्ञानामनुष्ठानाय निर्देशोवर्तते । यथा - १) ब्रह्मयज्ञ:, २) पितृयज्ञ:, ३) दैवयज्ञ:, ४) भूतयज्ञ:, ५) नृयज्ञश्च ।एतेषु यागेषु चम्पूभारतेकेचन यज्ञा: दरीदृश्यन्ते ।

प्राचीनभारतीयसामाकिसंस्थानस्य व्यावहारिकपक्षे यज्ञस्य महत्त्वंवरीवर्त्ति । "यज्ञ:"वेदस्य मुख्यप्रतिपाद्यविषयो भवति । मनुष्या: स्वर्गप्राप्तिनिमित्तं यज्ञाननुष्ठितवन्त: । **"यजेत स्वर्गकाम:"**इतिनिर्देशोऽपिवर्तते । परमात्मन:नि:श्वासभूतानां मुख्यप्रवृत्ति: तेषामनुष्ठानेएवभवति । यज्ञेन मानवकल्याणं सम्भवति । जगत:प्रारम्भएव यज्ञादभूत । गीतायामुच्यते -

**सहयज्ञा: प्रजा: सृष्ट्वापुरोवाचप्रजापति: ।**
**अनेनप्रसविष्टाध्वमेष वोऽस्विष्टकामधुक् ।।**
**देवान् भावयताऽनेन ते देवा भावयन्तु व: ।**
**परस्परंभावयन्त: श्रेय: परमवाप्स्यथ ।।**[१]

पद्मपुराणे मानवस्य उत्पत्ति: यज्ञादेवाभवदिति उच्यते । यथा -

**यज्ञनिष्पत्तये सर्वमेतद्ब्रह्मा चकार ह ।**
**चातुर्वर्ण्यं महाभाग यज्ञसाधनमुत्तमम् ।।**[२]

यज्ञस्य माहात्म्यं प्रासाङ्गिकताञ्च उररीकृत्य गीतायामुच्यते -

**यज्ञदानतप: कर्मन त्याज्यं करणीयमेव तत् ।**

**यज्ञो दानं तपश्चैवपावनानिमनीषिणाम् ।।**[३]

यथा च - **"यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः "**।[४]इति ।

श्रुति-स्मृतिग्रन्थेषुउपनिषत्सु च यज्ञः मानवस्य प्रधानधर्मइतिप्रतिपाद्यते । यः यज्ञस्य महत्त्वंनजानाति, यज्ञे नश्रद्दधति, यज्ञं नकरोतिसःनष्टोभवति । उक्तं च समालोचकैः -

**नास्त्यज्ञस्य लोको वै नायज्ञो विन्दतेशुभम् ।**

**अयोज्ञो न च पूतात्मा नश्यति छिन्नपर्णवत् ।।**[५]

गीतायामप्युच्यते -

**"नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम"**इति ।[६]

एवंशास्त्रनिर्दिष्टवचनप्रमाणानिमानवानांकृते यज्ञं सम्पादयितुं प्रेरयन्ति ।

वेदेषुबहुविधानां यागानां नामानि, तेषामनुष्ठानविधिः, महत्त्वमित्यादयः विषयाः उल्लिखितास्सन्ति । तेषु यागेषुदर्शपूर्णमासौ, सोमयागः, प्रवर्ग्ययागः, राजसूययागः, अश्वमेधयागः, पुत्रेष्टिः, पौण्डरिकयागः इत्यादयः प्रधानाःसन्ति । ब्राह्मणादयः अध्ययनं समाप्य यदा गृहस्थाभवन्ति, तदा तेषांकृते पञ्चमहायज्ञानामनुष्ठानाय निर्देशोवर्तते । यथा - १) ब्रह्मयज्ञः, २) पितृयज्ञः, ३) दैवयज्ञः, ४) भूतयज्ञः, ५) नृयज्ञश्च । उक्तं च मनुना -

**अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।**

**होमोदैवोबलिर्भौतोनृयज्ञोऽतिथिपूजनम् ।।**[७]इति ।

कर्ममीमांसायां प्रवृत्तस्य मानवस्य देहधारणमात्रेणैव तस्योपरि ऋणत्रयं सम्पतति । तद्यथा - ऋषिऋणम्, देवऋणम्, पितृ-ऋणञ्च । उक्तंहि -

**ऋणैस्त्रिभिर्द्विजोजातोदेवर्षिपितृणांप्रभोः ।**

**यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन् पतेत् ।।**[८]

तैत्तिरीयसंहितायामपिप्रतिपाद्यते - **"जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः"** इति । अत्रदेव-ऋणात् मुक्त्यर्थं यज्ञः क्रियते इतिप्रतिपादितः ।

एवं भारतीयसांस्कृतिकपरिसरेसामाजिकसंस्थाने यज्ञस्य प्रासङ्गिकता प्रतिपादिताऽस्ति। चम्पूभारते प्रायशः अश्वमेधयागः, राजसूययागः, प्रवर्ग्ययागः, पञ्चाग्निव्रतम्, पुत्रप्राप्तियागः, पौण्डरिकयागः इत्यादीनां यागानामनुष्ठानविषये सूचनाप्रदत्ताऽस्ति । तेषांविषये किञ्चिदधस्तादालोच्यते।

**क) चम्पूभारते राजसूययागः —** राजसूययागः राज्येऽभिषिक्तेन राज्यधुरं वहता क्षत्रियेणाऽनुष्ठेयः । अयं यागः प्राचीनसमये सूर्यवंशीयैः सोमवंशीयैरनुष्ठित इति ज्ञायते । महाभारते युधिष्ठिरेण अयं यागोऽनुष्ठित इतिवर्णितोऽस्ति ।

बहुषुपुराणेषुनैकासुशिलालेखासु च बहुभिः राजभिरस्य यागस्यानुष्ठानप्रसङ्गोऽपि उल्लिखितोवर्तते । अयं यागः बह्वीनामिष्टीनां द्वयोः पशुयागयोः, सप्तानांदर्वीहोमानांषण्णाञ्च सोमयागानां समुदायरूपः । अत्रषट् सोमयागाः, द्वौ पशुयागौ, एकोनत्रिंशदुत्तरशतम् इष्टयः(१२९), सप्तदर्वीहोमाश्चानुष्ठेयाः । यज्ञस्यास्य फाल्गुनशुक्लप्रतिपदिआरम्भः कर्त्तव्यः । ततो वर्षमेकं चातुर्मास्यानुष्ठानम् ।

चम्पूभारतेऽपि युधिष्ठिरेणास्य यागस्य अनुष्ठानंकृतम्इतिकविनाअनन्तभट्टेन चतुर्थस्तबकेप्रतिपादितम् । श्रीकृष्णेनकृताभ्यनुज्ञः धर्मराजः युधिष्ठिरः राजसूय-यागमारब्धवान् । तदा कर्त्तव्याकर्त्तव्यकर्मपौर्वापर्यज्ञानशालिनःपुरोधसः चत्वारः ऋत्विजः (होता-अध्वर्जु-ब्रह्मा-उद्गातारः), अन्ये च यज्ञवेदिकाकर्मकाराः तत्रआगताः । उक्तं च कविना -

**हरिणा स ततःकृताभ्यनुज्ञः**

**हविरादातुमिवागतेनसाक्षात् ।**

**क्रमवेदिपुरोधसांसमूहैः**

**क्रतुमाहर्त्तुमुपक्रमंप्रचक्रे ।।**[९]

यज्ञे पतिपत्न्योः उपस्थितिरनिवार्याभवति । अतः युधिष्ठिरः पत्न्या द्रौपद्यासाकं यज्ञशालामागतवान् । उक्तं च कविना -

**प्राग्वंशेऽप्युत्तमे विष्ठन्प्राग्वंशंपुनराविशत् ।**

**कुरीरशिरसा पत्न्या कुरुवीरः स दीक्षितः ।।**[१०]

उभौ यज्ञे दीक्षितौबभूवतुःइतिकविरत्र प्रतिपादयति । यज्ञाग्नौ हविरर्पणं युधिष्ठिरेण कृतम् । कवि यज्ञाग्नेः ज्वालां वर्णयन् लिखति -

**आप्सातुमिच्छुरनलोहविरत्र रुच्य-**

**मानीलधूमकुलनिर्गमनापदेशात् ।**

**जग्धान्पुराजतुनिकेतनभित्तिखण्डन्**

**कुक्षिस्थितानिववमगुरुनजीर्णान् ।।**[११]

देवानांसन्तृप्त्यर्थं प्रदत्तैः हविर्द्रव्यैः स्वादिष्टैःदेवताःसन्तुष्टाःबभुवुःइति प्रतिपादयन् कविर्लिखति -

**बिम्बेन सङ्गं बिसपुष्पबन्धो-**

**र्नाथ:कलनांन यथा विदध्यात् ।**

**तथैवदेवास्ततृपुस्तदानी -**

**मत्यद्भूतानांहविषांविशेषैः ।।**[१२]

**ख) चम्पूभारते प्रवर्ग्ययागः —** प्रवर्ग्यइतिकर्मणो नामधेयम् । स च सोमयागाङ्गभूतः । परं तैत्तिरीयसंहितायां ब्राह्मणेवा नास्य मन्त्राब्राह्मणानि वाऽऽम्नायन्ते । परं तैत्तिरीयारण्यके चतुर्थपञ्चमयोः प्रश्नयोः क्रमेणमन्त्राः विधयश्च आम्नाताः । काण्वमाध्यन्दिनयोः संहितयोः षट्त्रिंशादिषुत्रिष्वध्यायेषुमन्त्राः तच्छतपथयोः षोडशे त्रयोदशे च काण्डे विधयश्च यथाक्रमं निर्दिष्टाःसन्ति ।[१३]

चम्पूभारते प्रवर्ग्ययागस्य उल्लेखः चतुर्थस्तबके राजसूययागप्रसङ्गे कविना क्रियते । यथा -

**तत्र प्रवर्ग्यजनितं दिविधूमचक्र -**

**मालक्ष्यते स्मविबुधान्प्रतिपावकेन ।**

**आनाकदुर्वहहविर्द्रविणेनवेगा -**

**दाह्वानपत्रवलयं किल नीयमानम् ।।**[१४]

प्रवर्ग्ययागे वैदिकमन्त्रैःअग्नौहविरर्पणपूर्वकंदेवानाम्आह्वानं क्रियते इतिअस्मात्श्लोकात् ज्ञायते ।

**ग) चम्पूभारते अश्वमेधयागः —** यो नामैकच्छत्राधिपतिःसार्वभौमः, समग्रस्य भूमण्डलस्य शासकः, यस्य वशेऽन्ये सामन्ताराजानोवर्तन्ते, तेनैवराज्ञा अस्य यागस्य अनुष्ठानं क्रियते स्म । नसाधारण- क्षत्रियस्य ब्राह्मणवैश्ययोर्वातत्राधिकारः । अस्य "राजयज्ञः" इत्यपरं नामशास्त्रेषुवर्तते । यद्यप्ययं सोमयागः तथापिअत्र सवनीयपशुरश्वः, स च महोपकारकेषुपरिणिगतइतिकृत्वा तस्यैव नाम्ना यागोऽयं "अश्वमेध" इति व्यवहारं भजते । सर्वफलप्रदोऽयं क्रतुः ब्रह्महत्यादिमहापातकनाशकः । यागस्य अस्य अङ्गभूताः बहवः ग्राम्याः अरण्याश्च पशवोभवन्ति , तेषुअश्वःप्रथमः प्रधानभूतश्च । अश्वःपूर्वभागेकृष्णवर्णः, पश्चार्धैः श्वेतः, ललाटेशकटाकारपुण्ड्रयुतः गभीराकृतिश्च भवितुमर्हति । पूर्वमसकृत् पायितसोमरसाभ्यां मातृपितृभ्याम् अश्वाभ्यां जातएवजलान्तरपानात्पूर्वं पायितसोमरसो योऽश्वः तं यथावद् वर्धयित्वा रक्षेत् । सति समये तेनैव यागं कुर्यात् ।

चम्पूभारते चतुर्थस्तबकेआदौ मयेन युधिष्ठिराय मणिनिर्मितमास्थानचक्रंनिर्मितवान् । तदानारदः समागत्य युधिष्ठिरमश्वमेधयागं कर्त्तुमन्वरुणत् । तदुक्तंकविना -

**तामधिष्ठास्नुमभ्येत्यतंमखंकर्त्तुमन्वशात् ।**

**विपञ्चीरवसारज्ञोनृपं चीरवसांवरः ।।**[१५]

अत्र नारदनिर्दिष्टयागः “अश्वमेध” एवइतिटीकाकारेणरामचन्द्रमिश्रेणउक्तोऽस्ति । वस्तुतः राजसूयाश्वमेधयागयोः लक्ष्यमेकमेव भवति । राजानः स्वीयचक्रवर्तित्वं प्रति- पादयितुमेव अनयोः यागयोः अनुष्ठानं चक्रुः ।

एवं चम्पूभारतेनैकानां यागानामुल्लेखः कविनाअनन्तभट्टेनकृतः येषां प्रासङ्गिकता आधुनिकसमाजेऽपिइदानींवर्तते, अग्रेऽपिवर्त्तिष्यते ।

**घ) चम्पूबारते अतिथियागः —** भारतीयसंस्कृतौसामाजिकसंस्थानेअतिथिसेवाप्रमुखंस्थानंभजते । गृहागतानाम्अतिथीनां यथोचितसम्मानपूर्वकं तेषांकृतेआसन-पान-भोजनादिप्रदानेनसन्तुष्टीकरणंसर्वेषांगृहस्थानांप्रधानं कर्त्तव्यं भवति । अतएव ऋग्वेदे उच्यते - **“अतिथिदेवोभव”**इति । स्मृतिशास्त्रेषु प्रत्येकं गृहस्थस्य कृतेपञ्च महायज्ञानां (ब्रह्म-पितृ-दैव-भौत- नृयज्ञानां) निर्देशोवर्त्तते । विवाहसंस्कारात्परंस्नातकाःगृहपतयः गृहस्थाःबभूवुः । तत्रैवस्थित्वा ते महायज्ञैः पञ्चभिःपितृदेवतादीनां प्रीतिमापादयन्ति स्म । एतेषां यज्ञानामनिवार्यता प्रसङ्गे महाभारते उच्यते -

**पञ्च यज्ञास्तु यो मोहान्नकरोतिगृहाश्रमी ।**

**तस्य नायं न च परोलोकोभवतिधर्मतः ।।**[१६]

मनुस्मृतौ उच्यते -

**अध्यापनं ब्रह्मयज्ञः, पितृयज्ञस्तु तर्पणम्।**

**होमोदैवोबलिर्भौतोनृयज्ञोऽतिथिपूजनम् ।।**[१७]

एतेषुअतिथीनांसेवानृयज्ञ इत्युच्यते । यः कोऽपि वर्णीयः जनोभवतु, गृहागतस्य तस्य सेवा अवश्यं सर्वैः करणीयाइतिहितोपदेशे उच्यते । यथा -

**उत्तमस्यापि वर्णस्य नीचोऽपिगृहमागतः।**

**पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः।।**[१८]

पुनश्च तत्रैव कथ्यते -

**अरावप्युचितं कार्यमातिथ्यं गृहमागते ।**

**छेत्तुःपार्श्वगतं छायां नोपसंहरतेद्रुमः ।।**[१९]

अपरं च प्रतिपाद्यतेतत्र -

**अतिथिर्यस्य भग्नाशोगृहात्प्रतिनिवर्त्तते ।**

**सतस्मैदुष्कृतंदत्त्वा पुण्यमादाय गच्छति ।।**[२०]

कथमातिथ्यं कुर्यात् इत्यस्मिन् प्रसङ्गे मनुनो उच्यते -

**आसनावसथौ शय्यामनुव्रज्यामुपासनाम् ।**

**उत्तमेषूत्तमं कार्यं हीने हीनंसमेसमम् ।।**[२१]

समृद्धिशालिनस्तुजना:अतिथीनां मनोरञ्जनमप्यायोजयन् । महाभारतेकृष्ण:अर्जुनमतिथिरूपेण सम्प्राप्य तंरैवतकं पर्वतवनविहारार्थमनयत् इतिउदाहरणंवर्तते । तत्र नटनर्तकादयोऽभिनयं चक्रु: ।

एवंप्रकारेणनृयज्ञाङ्गभूततया अतिथिसेवाया: प्रासङ्गिकता अस्माकं भारतीयसंस्कृतौ अवश्यमेव सर्वस्मिन्काले अनुभूयते । चम्पूभारतकर्त्ताअनन्तभट्ट: स्वीयकाव्ये बहुषुस्थलेषुअतिथीनांसत्कारप्रसङ्गं वर्णयति । द्वितीयस्तबके चित्ररथेन सह संग्रामंकृत्वातेन सह मित्रतां च सम्प्राप्य पाण्डवा: धौम्याश्रमं प्रतिआगता: । तत्र तेषामतिथिरूपेणसत्कार: धौम्येन सम्पादित: । अत्रकवि:लिखति -

**यथाऽतिथ्यविधौ प्रीत: स पुरस्कृरुतेस्मतान् ।**

**तथाऽध्वगमनेतेऽपितं प्रश्रयवशंवदा: ।।**[२२]

स:प्रीत: धौम्य: तान्पाण्डवान् आतिथ्यविधौ आसनभोजनादिप्रदानपूर्वकं सममानयत् इतिकविरत्र प्रतिपादयति ।

तृतीयस्तबके आरम्भेकृष्णप्रस्थानादनन्तरम्इन्द्रप्रस्थंप्रतिनारद:समागच्छति । तस्य स्वागतमातिथ्यं च कविनाअत्र उपस्थाप्येति। यथा -

**दृष्ट्वानृपोदेवमुनिंविनीतो**

**मौलिस्त्रजांधूलिमधूलिवृन्दै: ।**

**स पङ्कमाधाय तदङ्घ्रियुग्मं**

**विपङ्कमात्मानमयं व्यतानीत् ।।**[२३]

समागतस्यअतिथे:आदौ चरणस्पर्श: क्रियते । युधिष्ठिर: स्वासनादुत्थाय विनीत: मुनेर्नारदस्य अङ्घ्रियुग्मं स्पृष्ट्वास्वंपापंप्राणुदतइतिकविरत्र कथयति । वस्तुत:अतिथीनां चरणवन्दनेनसर्वेषांपापानांविनाशो अवश्यं भवतिइतिअस्माकं भारतीयानां पूर्णविश्वासोवर्त्तते ।

चरणपूजनादनन्तरंनारदस्य आसनप्राप्ति:, आसने उपावेश्य पात्रजलै:पादप्रक्षालनमपि युधिष्ठिरेण कृतम्, यत् अतिथिसेवाया: द्वितीयं कर्त्तव्यं भवति । नारदस्य अतिथिरूपेणसमागमनेनपाण्डवानांमन:प्रफुल्लतांप्रतिपाद्यकवि:लिखति -

**मेध्यां बृषीमधिगतस्य विरिञ्चिसूनो-**

**रास्थायसंविधिमुदारमुदांकुरूणाम् ।**

**तस्याद्भुतागमनहेतुपरिच्छिदायां**

**चित्तानिदूरपथवर्तनतामवापु:।।**[२४]

तत्रैवपुन:अतिथे: पादप्रक्षालनप्रसङ्ग: कविनाइत्थंप्रतिपाद्यते - "**राज्ञाऽमुनासमुचितेषुसभाजनेषु, पात्रैश्च पाणिविधृतै:०**"इत्यादि: ।

नारद:अनेनराज्ञापरिजनकरगृहीतपात्रै: पूजोपकरणधारकस्थाल्यादिभि: संस्कार-पूजनानिकृतानिइतिश्लोकार्धेनकवि:अभिप्रैति ।

## सन्दर्भा:—


१. गीता - ३/१०-११

२. सृष्टिखण्ड: -३/१२३

३. गीता - १८/५

४. गीता -३/९

५. कल्याण-वेद-कथाङ्क, गीताप्रेस-पृ./३४०

६. गीता - ४/३१

७. मनुस्मृति: - ३/१०

८. क.मी. - १०/८४/३९

९. च.भा. - ४/७

१०. च.भा. - ४/८

११. च.भा. - ४/९

१२. च.भा. ४/१२

१३. यज्ञतत्त्व प्रकश: - पृ.५४

१४. च.भा. ४/१०

१५. च.भा. - ४/२

१६. म.भा. शा.प.-१३४/२६

१७. मनुस्मृति: - ३/१०

१८. हितोपदेश:मित्रलाभ:श्लो ६४/पृ.९३

१९. तत्रैवश्लो. ५९/पृ.९१

२०. तत्रैवश्लो. ६३/पृ. ९३

२१. मनुस्मृति: -३/१०७

२२. च.भा. २/६६

२३. च.भा. ३/४

२४. च. भा. - ३/५

## सहायकग्रन्थसूची


१) याज्ञवल्क्यस्मृतिः- सम्पादकः - वासुदेवलक्ष्मणशास्त्रीपंसिकरः, पाण्डुरङ्गजावाजी, निर्णयसागरप्रैस्, मुम्बई, संस्करणम् - १९३६

२) हितोपदेशः (नारायणपण्डितकृतः)- सम्पादकः - शेषराजशर्मरिग्मी, चौखम्बाविद्याभवनम्, नईदिल्ली

३) चम्पूभारतम् (अनन्तभट्टप्रणीतम्)-सम्पादकः - आचार्यरामचन्द्रमिश्रः, चौखम्बाविद्याभवन, वाराणसी, २२१ ००१, द्वितीयसंस्करणढ् - २००५

४) चम्पूभारतम् (अनन्तकविप्रणीतम्)- सम्पादकः - नारायण राम आचार्यः “काव्यतीर्थः”, मुन्शीराममनोहरलालपब्लिकेशन्सप्राइवेट्लिमिटेड्, पोष्टवक्सनं - ५७१५, ५४, राणीझान्सीरोड, नईदिल्ली, ११००५५, द्वितीयसंस्करणम् - १९८३

५) कामन्दकीयनीतिसारः - सम्पादकः - टी.गणपतिशास्त्री, अनन्तशयने महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशाशनेनराजकीयमुद्रणालये मुद्रयित्वा प्रकाशितः ; संस्करणम् - १९१२

६) महाभारतम्- सम्पादकः - प्रो.आर्.एन्.दाण्डेकरः, भण्डारकररिसर्च इन्स्टिच्युट्, पुने संस्करणम्– १९६१

७) ऋग्वेदसंहिता - वैदिकसंशोधनमण्डलम्, पुने - ४११ ०३७, तृतीयसंस्करणम् - १९८४

८) अथर्ववेदः - सम्पादकः - शङ्कर पाण्डुरङ्ग पण्डित, कृष्णदासअकादमी, वाराणसी - २२१ ००१, संस्करणम्– १९८९

९) ईशादिनौउपनिषद्, शाङ्कर भाष्यम्- गीताप्रेस्गोरखपुर - २७३००५ ,संस्करणम्– २०००

१०) नाट्यशास्त्रम् (भरतकृतम्) - सम्पादकः - श्रीबाबूलालशुक्लशास्त्री, चौखम्बासंस्कृतसंस्थान, वाराणसी - २२१ ००१, प्रथमसंस्करणम् - १९७८